# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

# सत्रान्तपरीक्षा- एप्रिल,२०१९

**कक्षा:- शास्त्री-२** (SEM-4) | **प्रश्नपत्रम् -५** | **गुणाः - ७०**

**विषयः: नव्यन्यायः** | **(CC- 2.4.7)** | **समयः३:०० तः ६:००**

**दिनाङ्कः :०३-०४-२०१९**

ग्रन्थः – चतुर्दशलक्षणी – प्र.स्वलक्षणम्

---

**विभागः-१**

**प्रश्नः-१** निम्नलिखितेषु द्वयोः व्याख्यां लिखत। (१०)

(१) 'अथ समवायितया' इति मूलं न संगतमिति पूर्वपक्षमुपस्थापयत।

(२) व्यधिकरणधर्मावच्छिन्नाभावं व्याख्यात।

(३) 'इदं वाच्यं ज्ञेयत्वादि'ति मणिं व्याख्यात।

**प्रश्नः-२** निम्नलिखितयोः एकस्य व्याख्यां विशदतया लिखन्तु। (१०)

(१) वाच्यत्वं पदशक्तिर्वा पदशक्तिविषयत्वं वा इति स्पष्टं विशदयत।

(२) प्रमेयसाध्यकस्थले साध्याभावप्रसिद्ध्युपपादनम् उपपादयत।

**विभागः-२**

**प्रश्नः-३** निम्नलिखितेषु द्वयोः व्याख्यां कुरुत। (१०)

(१) प्रथमस्वलक्षणमेकत्र समन्वयत।

(२) 'अत्यन्ताभावस्य ध्वंसाऽत्यन्ताभावसमनियतता' इति मते दोषं प्रतिपादयत।

(३) दैशिकविशेषणतायाः क्वापि व्यापकताघटकत्वं न स्यादित्याक्षेपं निराकुरुत।

**प्रश्नः-४** निम्नलिखितयोः एकस्य व्याख्यां विशदतया लिखत । (१०)

(१) 'तत्सामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यमि'ति दीधितिं यथाग्रन्थं व्याख्यात ।

(२) 'एवं दलान्तरेऽपी'ति दीधितिग्रन्थावतारं व्याख्यात।

**विभागः-३**

**प्रश्नः-५** निम्नलिखितेषु द्वयोः व्याख्यां कुरुत। (१०)

(१) गदाधरीयं स्वयं लघुलक्षणं व्याख्यात।

(२) स्ववैशिष्ट्यविशेषणप्रयोजनं यथागदाधरीं विशदयत।

(३) विशिष्टवैशिष्ट्यधीहेतुत्वं कस्येति व्याख्यात।

**प्रश्नः-६** निम्नलिखितयोरेकस्य व्याख्यां विशदतया ददतु। (१०)

(१) 'जलादिवृत्तित्वेत्या'दिदीधितिं गदाधरोक्तदिशा विवृणुत।

(२) चतुर्दशलक्षणानां परिचयं यच्छत ।

**प्रश्नः-७** निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु। (१०)

१. केवलान्वयी नाम कः?
२. रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरसद्धेतुर्वा?
३. साध्याभावः कस्य अप्रसिद्धः?
४. भगवदिच्छा घटादिषु केन सम्बन्धेन वर्तते?
५. का नाम परिभाषा?
६. किं नाम भूतत्वम्?
७. किं नाम वाच्यत्वम्?
८. अव्यासज्यवृत्तित्वं नाम किम्?
९. स्वरूपसम्बन्धो नाम कः?
१०. 'गुणकर्माण्यत्वविशिष्टसत्तावान् जाते'रित्यत्र हेतुः कीदृशः?
११. अत्यन्ताभावः कतिविधः?
१२. यत्समानाधिकरणपदप्रयोजनं किम्?
१३. किं नाम संसर्गत्वम्?
१४. अन्वयव्याप्तिः का?
१५. नव्यन्यायप्रवर्तकः कः?

* * * * * * * * * *

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा- अप्रिल्,२०१९

**कक्षा:- शास्त्री-२** (SEM-4) **प्रश्नपत्रम् -५** **गुणाः - ७०**

**विषयः: नव्यन्यायः** **(CC- 2.4.7)** **समयः -**

**दिनाङ्कः :**

**ग्रन्थः** – चतुर्दशलक्षणी – प्र.स्वलक्षणम्

---

**प्रश्नः-७**

१. अन्वयमात्रव्याप्तिकः केवलान्वयी/व्यधिकरणधर्मावच्छिन्नो वा।

२. सद्धेतुरेव।

३. केवलान्वयिसाध्यकस्य।

४. विषयतासम्बन्धेन।

५. तान्त्रिकसङ्केतः।

६. बहिरिन्द्रियज्ञानविशेषगुणवत्त्वम्।

७. पदशक्यत्वम्/भगवदिच्छाविषयत्वम्।

८. एकमात्रवृत्तित्वम्।

९. दैशिकविशेषणतासम्बन्धः।

१०. व्यभिचारीहेतुः।

११. द्विविधः-समानाधिकरणधर्मावच्छिन्न-व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः।

१२. अयमात्मा ज्ञानादित्यत्राव्याप्तिवारणम्।

१३. विशिष्टबुद्धिनियामकत्वम्।

१४. हेतुसाध्ययोर्व्याप्तिः।

१५. गङ्गेशोपाध्यायः।